No. २२६ / घ

Title नीतिशतकम्

Author भर्तृहरिः

Extent १२ पत्र Age

Subject काव्य

भा० ८८ ६२६

नीतिशतकम्

[illegible] १२५

१२ पत्राणि

॥श्रीमद्याज्ञिकदेवदत्तसुतविजयदत्तेनविक्रयगृहीतं।को॰३।३७माटेमर्गेजी॥
निशनकी। हस्तेनाप्त उपाध्यानेलीधीसंवत१८१२मितीभाद्रपदकृष्ण६।बुधे।।प॰१३

भ. १

॥ ॥श्रीगणेशायनमः॥ ॥अज्ञः सुखमाराध्यः सुखतरमाराध्यते विशेषज्ञः ज्ञानल
वदुर्विदग्धं ब्रह्मापि नरं न रंजयति॥१॥प्रसह्यमणिमुद्धरेन्मकरवक्त्रदंष्ट्रांकुरात्समुद्र
मपिसंतरेत्प्रचलदूर्मिमालाकुलं।भुजंगमपिकोपितंशिरसिपुष्पवद्धारयेन्नतुप्रति
निविष्टमूर्खजनचित्तमाराधयेत्॥२॥लभेतसिकतासुतैलमपियत्नतःपीडयन्पि
बेच्चमृगतृष्णिकासुसलिलंपिपासार्दितः।कदाचिदपिपर्यटञ्छशविषाणमासाद
येन्नतुप्रतिनिविष्टमूर्खजनचित्तमाराधयेत्॥३॥शशीदिवसधूसरोगलितयौवना
कामिनीसरोविगतवारिजंमुखमनक्षरंस्वाकृतेः।प्रभुर्धनपरायणःसततदुर्गतः राम
सज्जनोनृपांगणगतःखलोमनसिसप्तशल्यानिमे ४ मणिःशाणोल्लीढःसमर। १

१४

विनयी हेतिदलितो मदक्षीणो नागः शरदि सरितः श्यामपुलिनाः कलाशेषश्चंद्रः सुर
तमृदिता बालवनिता तनिम्ना शोभंते गलितविभवाश्चार्थिषु जनाः ॥५॥ परिक्षीणः क
श्चित्स्पृहयति यवानां प्रसृतये स पश्चात्संपूर्णो गणयति धरित्रीं तृणसमां । अतश्चानेकां
ता गुरुलघुतयार्थेषु धनिनामवस्था वस्तूनि प्रथयति च संकोचयति ॥६॥ शास्त्रोपस्कृ
तशब्दसुंदरगिरः शिष्यप्रदेयागमा विख्याताः कवयो वसंति विषये यस्य प्रभोर्निर्धनाः ।
तज्जाड्यं वसुधाधिपस्य सुधियो ह्यर्थं विनापीश्वराः कुत्स्याः स्युः कुपरीक्षका न मणयो यैर
र्घतः पातिताः ॥७ विपदि धैर्यमथाभ्युदये क्षमा सदसि वाक्पटुता युधि विक्रमः । यशा
सि चाभिरुचिर्व्यसनं श्रुतौ प्रकृतिसिद्धमिदं हि महात्मनां ८ निंदंतु नीतिनिपुणा यदि

भ॰ वास्तवंतुलक्ष्मीः समाविशतु गच्छतु वा यथेष्टं । अद्यैव वा मरणमस्तु युगांतरे वा न्याय्यात्पथः
२ प्रविचलंति पदं न धीराः ॥ ८ ॥ हर्तुर्याति न गोचरं किंशं पुष्णाति सर्वात्मनाप्यर्थिभ्यः प्रतिपा
५ द्यमानमनिशं वृद्धिं परां गच्छति । कल्पांतेष्वपि न प्रयाति निधनं विद्याख्यमंतर्धनं येषां ता
न्प्रति मानमुज्झत जनाः कस्तैः सहस्पर्द्धते ॥ १० ॥ अधिगतपरमार्थान्पंडितान्मावमंस्थास्तृ
णमिव लघुलक्ष्मीर्नैव तान्संरुणद्धि । अभिनवमदलेखाश्यामगंडस्थलानां न भवति
विसतंतुर्वारणं वारणानां ॥ ११ ॥ क्षुत्क्षामोपि जराकृशोपि शिथिलप्रायोपि दीनां दशा
मापन्नोपि विपन्नदीधितिरपि प्राणेषु नश्यत्स्वपि । मत्तेभेंद्रविभिन्नकुंभकवलग्रासैकब राम
द्धस्पृहः किं जीर्णं तृणमत्ति मानमहतामग्रेसरः केसरी ॥ १२ ॥ प्रिया न्याय्या वृत्तिर्मलिनमसु २
१५

ष्मंतोथसुकरंच्यसंतोनाम्पवर्ग्याःसुहृदनपिनयाच्यःकृशधनः।विपद्युच्चैःस्थेयंपदमनुविधेयंच
महतांसतांकेनोद्दिष्टंविषममसिधाराव्रतमिदं॥१३॥मनसिवचसिकायेपुण्यपीयूषपूर्णा
स्त्रिभुवनमुपकारश्रेणिभिःप्रीणयंतः।परगुणपरमाणून्पर्वतीकृत्यनित्यंनिजहृदिवि
कसंतःसंतिसंतःकियंतः १४ इतःस्वपितिकेशवःकुलमितस्तदीयद्विषामितश्चशरणा
र्थिनःकुलपतत्त्रिणःशेरते।इतोपिवडवानलःसहसमस्तसंवर्तकैरहोविततमूर्जितंभरस
हंसिंधोर्वपुः १५ उदन्वच्छन्नाभूःसचनिधिरपांयोजनशतंसदापांथःपूष्णागगणंपरिमा
णंकलयति।इतिप्रायोभावाःस्फुरदवधिमुद्रामुकुलिताःसतांप्रज्ञोन्मेषःपुनरयमसीमा
विजयते १६ क्वचिद्भूमौशय्याक्वचिदपिचपर्यंकशयनःक्वचिच्छाकाहारःक्वचिदपिच

भ॰ ३
3

याल्पोदनरुचिः।क्वचित्कंथाधारीक्वचिदपिचदिव्यांबरधरोमनस्वीकार्यार्थीगन
यतिनदुःखंनचसुखं॥१७॥नमस्यामोदेवान्ननुहतविधेस्तेपिवशगाविधिर्वंद्यःसो
पिप्रतिनियतकर्मैकफलदः।फलंकर्मायत्तंयदिकिममरैःकिंचविधिनानमस्तत्कर्म
भ्योविधिरपिनयत्रप्रभवति॥१८॥येसंतोषसुधाँत्रबुद्धमनसस्तेषामभिन्नामुदोयेत्व
न्येधनलोभसंकुलधियस्तेषांनतृष्णाहता।इत्थंकस्यकृतेकृतःसविधिनातादृक्पदं
संपदांस्वात्मन्येवसमाप्तहेममहिमामेरुर्नमेरोचते॥१९॥दौर्मंत्र्यान्नृपतिर्विनश्यतिय
तिःसंगात्सुतोलालनाद्विप्रोनध्ययनात्कुलंकुतनयाच्छीलंखलोपासनात्।ह्रीर्मद्या राम
दनवेक्षणादपिकृषिस्त्यागात्प्रमादाद्धनंमैत्रीचाप्रणयात्समृद्धिरनयात्स्नेहःप्रवा ३

१६

साश्रयात्॥२०॥रक्तत्वंकमलानांसत्पुरुषाणांपरोपकारित्वं।असतांचनिर्द्दयत्वंस्वभाव
सिद्धंत्रिषुत्रितयं॥२१॥जाड्यंह्रीमतिगण्यतेव्रतरुचौदंभःशुचौकैतवंशूरेनिर्घृणतामुनौवि
मतितादैन्यंप्रियालापिनि।तेजस्विन्यवलिप्ततामुखरतावक्तर्यशक्तिःस्थिरेतत्कोनाम
गुणोभवेत्सगुणिनांयोदुर्जनैर्नांकितः॥२२॥जातिर्यातुरसातलंगुणगणस्तस्याप्यध
ोगच्छतांशीलंशैलतटात्पतत्वभिजनःसंदह्यतांवह्निना।शौर्येवैरिणिवज्रमाशुनि
पतत्वर्थोस्तुनःकेवलंयेनैकेनविनागुणास्तृणलवप्रायाःसमस्ताइमे॥२३॥भ
ग्नाशस्यकरंडपिंडिततनोर्म्लानेंद्रियस्यक्षुधाकृत्वाखुर्विवरंस्वयंनिपतितोनक्तंमुखे
भोगिनः।तृप्तस्तत्पिशितेनसत्वरमसौतेनैवयातःपथास्वस्थास्तिष्ठतदैवमेवहिनृणां

भ॰ ४ 4

दृष्टौ ह्ययेकारसांगा शक्यपातितोपि कराद्धातैस्तु पतत्येव कंदुकः। ज्ञायेताहि सुवृत्तानामभ्या
पित्स्योतिभूतयः २५ दैवात्कंदुकपातेनोत्पततत्यार्यः पतन्नपि। ईतथात्वनार्यः पतति
मृत्पिंडपतनं यथा २६ यः स्त्रीणां येत्सु च रितैः पितरं सपुत्रो यज्ञैर्हरेवहितमिच्छति तत्क
लत्रां तन्मित्रमापदि सुखे च समभक्तियं यदे तत्त्रयं जगाति पुण्यकृतां लभंते २७ संपत्सु म
हतां चित्तं भवेदुत्पलकोमलं। आपत्सु च महाशैलशिलासंघातकर्कशं २८ दुर्जन
:परिहर्तव्यो विद्ययालंकृतोपि सन्। मणिना भूषितः सर्पः किमसौ न भयंकरः २९
क्षीरेणात्मगतोदकाय हि पुरा दत्ता गुणास्ते खिलाः क्षीरे तापमवेक्ष्य तेन पयसा ह्या
त्मा कृशानौ हुतः। गंतुं पावकमुन्मनस्तदभवद् दृष्ट्वा तु मित्रापदं युक्तं तेन जलेन शाम्य

राम
४
२७

तिमतांमैत्रीपुनस्त्वीदृशी ३० यासाधून्मुखरान्करोतिविदुषोमूर्खान्हितान्द्वेषिणः
प्रत्यक्षंकुरुतेपरोक्षममृतंहालाहलंतत्क्षणात्तामाराधयचंडिकांभगवतींभोक्तुंफलं
वांछितंहेसाधोत्वमतीगुणेषुविफलेष्वास्थांवृथामाकृथाः ३१ कृमिकुलचितंला
लाक्लिन्नंविगंधिजुगुप्सितंनिरुपमरसप्रीत्याखादन्नरास्थिनिरामिषंसुरपतिमपिश्वा
पार्श्वस्थंविलोक्यनशंकतेनहिगणयतिक्षुद्रोजंतुःपरिग्रहफल्गुतां ३२ स्वल्पंस्ना
युवशावशेषमलिनंनिर्मांसमप्यस्थिकंश्वालब्ध्वापरितोषमेतिनचतत्तस्यक्षुधा
शांतये। सिंहोजंबुकमंकमागतमपित्यक्त्वानिहंतिद्विपंसर्वःकृच्छ्रगतोपिवांछतिजन
:सत्वानुरूपंफलं॥ ३३ पापान्निवारयतियोजयतेहितायगुह्यंनिगूहतिगुणान्प्रक

म० ५

रीकरोति।आपद्गतंचनजहातिददातिकालेसन्मित्रलक्षणमिदंप्रवदंतिसंतः ३४ मृग
मीनसज्जनानांतृणजलसंतोषविहितवृत्तीनां।लुब्धकधीवरपिशुनानिःकारणवैरि
णोजगति। ३५ संतप्तायसिसंस्थितस्यपयसोनामापिनज्ञायतेमुक्ताकारतयातदेवन
लिनीपत्रस्थितंराजतेस्वात्यांसागरशुक्तिमध्यपतितंतज्जायतेमौक्तिकंप्रायेणाधमम
ध्यमोत्तमगुणाःसंसर्गतोजायते ३६ अंभोजिनीवनविलासनिवासमेवहंसस्यहंतु
नितरांकुपितोविधाता।नत्वस्यदुग्धजलभेदविधौप्रसिद्धांवैदग्ध्यकीर्तिमपहर्तुमसौ
समर्थः ३७ ब्रह्मायेनकुलालवन्नियमितोब्रह्मांडभांडोदरेविष्णुर्येनदशावतारगहने राम
क्षिप्तोमहासंकटे।रुद्रोयेनकपालपाणिपुटकेभिक्षाटनंकारितःसूर्योभ्राम्यतिनि ५

१८

त्वमेवानेनतस्मैनमःकर्मणे ३८ कुसुमस्तवकस्येवद्वयीवृत्तिर्मनस्विनःमूर्ध्निवासर्वलो
कस्यशीर्यतेवनएववा ३९ मौनान्मूकःप्रवचनपटुर्जल्पकोवातुलोवाधृष्टःपार्श्वेनिव
सतियदादूरतश्चाप्रगल्भःक्षांत्याभीरुर्यदिनसहतेप्रायशोनाभिजातःसेवाधर्मःपरमग
हनोयोगिनामप्यगम्यः ४० नम्रत्वेनोन्नमंतःपरगुणनुतिभिःस्वान्गुणान्ख्यापयंतःपुष्ण
तःस्वीयमर्थंविततपृथुतरारंभयत्नाःपरार्थेक्षांत्यैवाक्षेपरूक्षाक्षरमुखरमुखान्दुर्मुखान्दू
षयंतःसंतःसाश्चर्यचर्याजगतिबहुमताःकस्यनाभ्यर्चनीयाः ४१ लोभश्चेदगुणेनकिं
पिशुनतायद्यस्तिकिंपातकैःसत्यंचेत्तपसाचकिंशुचिमनोयद्यस्तितीर्थेनकिंसौजन्यंय
दिकिंगुणैःसुमहिमायद्यस्तिकिंमंडनैःसद्विद्यायादिकिंधनैरपयशोयद्यस्तिकिंमृत्युना

म० ६

४२ खल्वाटो दिवसेश्वरस्य किरणैः संतापितो मस्तके वांछन्देशमनातपं विधिवशा
द्बिल्वस्य मूलं गतः। तत्राप्यस्य महाफलेन पतता भग्नं सशब्दं शिरः प्रायो गच्छति यत्र भा
ग्यरहितस्तत्रैव यान्त्यापदः॥ ४३ नैवाकृतिः फलति नैव कुलं न शीलं विद्यानचा
पि न च यत्नकृतापि सेवा भाग्यानि पूर्वतपसा किल संचितानि काले फलंति पुरुषस्य य
थैव वृक्षाः ४४ ऐश्वर्यस्य विभूषणं सुजनता शौर्यस्य वाक्संयमो ज्ञानस्योपशमः
शमस्य विनयो वित्तस्य पात्रे व्ययः। अक्रोधस्तपसः क्षमा प्रभवितुर्धर्मस्य निर्व्याजता सर्वे
षामपि सर्वकारणमिदं शीलं परं भूषणं ४५ एते सत्पुरुषाः परार्थघटकाः स्वार्थं परित्य
ज्य ये सामान्यास्तु परार्थमुद्यमभृतः स्वार्थाविरोधेन ये। ते मी मानुषराक्षसाः परहितं स्वा

राम ६ १८

र्थायनिघ्नंतियेयेतुघ्नंतिनिरर्थकंपरहितंतेकेनजानीमहे ४६ जाड्यंधियोहरतिसिंचतिवाचि
सत्यंमानोन्नतिंदिशतिपापमपाकरोति।चेतःप्रसादयतिदिक्षुतनोतिकीर्त्तिंसत्संगतिः
कथयकिंनकरोतिपुंसां ४७ वांछासज्जनसंगमेपरगुणेप्रीतिर्गुरौनम्रताविद्यायांव्य
सनंस्व योषितिरतिर्लोकापवादाद्भयं।भक्तिःशूलिनिशक्तिरात्मदमनेसंसर्गमुक्ति
:खलेष्वेतेयेषुवसंतिनिर्मलगुणास्तेभ्योनरेभ्योनमः ४८ दुर्ग्राह्यंहृदयंतथैववदनं
यद्दर्पणांतर्गतंभावःपर्वतसूक्ष्ममार्गविषमःस्त्रीणांनविज्ञायते।चित्तंपुष्करपत्रतोयतर
पत्रतोयतरलंविद्वद्भिराशंसितंनारीनामविषांकुरैरिवलतादोषैःसमंवर्द्धिता ४९
तृष्णांछिंधिभजक्षमांजहिमदंपापेरतिंमाकृथाःसत्यंब्रूह्यनुयाहिसाधुपदवींसेवस्ववि

भ॰वै द्वज्ञानान्नामात्यान्मातयति हि विघोथनु नय प्रख्यापयस्त्वान्गुणान्कीर्त्तिं पालयद्भुः खित्ते कुरु
७ दयामेतत्सतां चेष्टितं ५० गुणावदगुणावद्वाकुर्वता कार्यजातं परिणतिरवधार्या यत्न
7 तः पंडितेन अतिरभसकृतानां कर्मणामाविपत्ते भवति हृदयदाही शल्यतुल्यो विपाकः
५१ स्थाल्यां वैडूर्यमय्यां पचति तिलखलीं चंदनैरिंधनौघैः सौवर्णैर्लांगलाग्रैर्विलिखति
वसुधामर्कमूलस्य हेतोः छित्वा कर्पूरकोडान्वृतिमिह कुरुते कोद्रवाणां समंतात् प्राप्ये
मां कर्मभूमिं न चरति पुरुषो यस्तपो मंदभाग्यः ५२ एको देवः केशवो वा शिवो वा एकं
मित्रं भूपतिर्वा यतिर्वा एको वासः पत्तने वा वने वा एका भार्या सुंदरी वा दरी वा ५३ वने राम
रणे शत्रुजलाग्निमध्ये महार्णवे पर्वतसंकटे वा सुप्तं प्रमत्तं विषमा[illegible]तं वा रक्षंति पुण्यानि पु ७
२०

राकृतानि ५४ भीमंवनंभवतितस्यपुरंप्रधानंसर्वेजनाःसुजनतामुपयांतितस्याकृत्वा
चमूर्भवतिमन्निधिरत्नपूर्णायस्यास्तिपूर्वसुकृतंविपुलंतरस्य ५५ यन्नागामदभिन्नग
डफलकान्तिदंतिद्वालसाद्वारेहेमविभूषणाश्चतुरगावल्गंतियेदर्पिताः वीणावेणुमृ
दंगशंखपटहैःसुप्तश्चयद्बोध्यतेतत्सर्वंसुरलोकसिद्धिसदृशंधर्मस्यविस्फूर्जितं ५६
मज्ञात्वंभमियातुमेरुशिखरंशत्रुंजयत्वाहवेवाणीज्यंकृषिमेवतादिसकलाविद्याःकला
ःशिक्षतुंशक्ताकाशंविपुलंप्रयातुखगवत्कृत्वाप्रयत्नंपरंनाभाव्यंभवतीहकर्मवशतो
भाव्यस्यनाशःकुतः ५७ वरंप्राणच्छेदःसमदमघवन्मुक्तकुलिशैःप्रहारैरुद्गच्छद्दहन
गंदहनोद्गारगुरुभिःतुषाराद्रेःसूनोरहहपितरिक्लेशविवशेनचासौसंवासःपयसिपयसां

भ॰वै॰ पत्युनुचितः ५८ नेतायस्यबृहस्पतिःप्रहरणंवज्रंसुराःसैनिकाःस्वर्गोदुर्गमनुग्रहः
८ खलुहरैरैरावणोवारणः इत्यैश्वर्यबलान्वितोपिमघवाभग्नःपरैःसंगरेतद्व्यक्तंननुदैवमे
४ वशरणंधिग्धिग्वृथापौरुषं ५९ कर्मायत्तंफलंपुंसांबुद्धिःकर्मानुसारिणी।तथापिसु
धियाभाव्यंसुविचार्यैवकुर्वता ६० आलस्यंहिमनुष्याणांशरीरस्थोमहान्रिपुः।नास्त्यु
द्यमसमोबंधुःकृत्वायन्नावसीदति ६१ वरंपर्वतदुर्गेषुभ्रांतंवनचरैःसह।।नमूर्खजनसंस
र्गःसुरेंद्रभवनेष्वपि ६२ दानंभोगोनाशस्तिस्रोगतयोभवन्तिवित्तस्य।योनददातिनभुंक्ते
तस्यतृतीयागतिर्भवति ६३ यस्यास्तिवित्तंसनरःकुलीनःसपंडितःसःश्रुतवान्गुणज्ञः।स राम
एववक्तासचदर्शनीयःसर्वेगुणाःकांचनमाश्रयंति ६४ रत्नैर्महार्हैस्तुतुषुर्नदेवानभेजि ८
२१

रेत्तीमविशेष्यत्तीतिंसुधांविनानज्ययुर्विरामंतनिश्चितार्थाद्विरमंतिधीराः ६५ संत्यन्येपिवृ
हस्पतिप्रभृतयःसंत्तावितःपंचषास्ताग्रत्येषविशेषविक्रमगुणोराहुर्नवैरायतेद्वावेवग्रसते
दिनेश्वरनिशाप्राणेश्वरौभाश्वरौभ्रांतःपर्वणिपश्यदानवपतिःशीर्षावशेषीकृतैः ६६
इयंत्येतस्मिन्नवानिरवधिचमत्कृत्यतिशयेवराहोराहु॰द्वीपमवतिचमत्कारविषयः।महीम
कोमग्नांयदयमवहृद्दंष्ट्रमलिनाद्धिरःशेषःशत्रुंनिगिलतिपरःसंत्यजतिच ६७ श्रोत्रंश्रुति
नैवनकुंडलेनदानेनपाणिर्नतुकंकणेन।विभातिकायःकरुणाकुलानांपरोपकारेणन
चंदनेन ६८ जयंतितेसुकृतिनोरससिद्धाःकवीश्वराः नास्तियेषांयशःकायेजरामरण
जन्मतीः ६९ यद्धात्रानिजभालपट्टलिखितंस्तोकंमहद्वाधनंतत्प्राप्नोतिमरुस्थलेपिनित

भ॰वै॰ ९ राः मेरौ ततो नाधिकं तद्धीरो भव वित्तवत्सु कृपणां वृत्तिं वृथा मा कृथाः कूपे पश्य पयोनिधाव
९ पि घटो गृह्णाति तुल्यं जलं ७० लांगूलचालनमधश्चरणावपातं भूमौ निपत्य वदनोदरद
र्शनं चा श्वा पिंडदस्य कुरुते गजपुंगवस्तु धीरं विलोकयति चाटुशतैश्च भुंक्ते ७१ राजन्दु
धुक्षसि यदि क्षितिधेनुमेनां तेनाद्य वत्समिव लोकमिमं पुषाण तस्मिंश्च सम्यगनिशं परि
पोष्यमाणे नानाफलैः फलति कल्पलतेव भूमिः ७२ सत्यानृता च परुषा प्रियवादिनी च
हिंस्रा दयालुरपि चार्थपरा वदान्या नित्यव्यया प्रचुरनित्यधनागमा च वारांगनेव नृपनीतिरने
करूपा ७३ न कश्चिच्चंडकोपानामात्मीयो नाम भूभुजां होतारमपि जुह्वानं स्पृष्टो दहति राम
पावकः ७४ विपदि महतां धैर्यध्वंसं यदीक्षितुमीहसे चिरमविरसादस्माद्दूरं दुरध्यवसायत ९
२२

ः अपिजलनिधेः कल्पापायेप्यपेतनिजक्रमाः कुलशिखरिणः क्षुद्रा नैते न वा जलराशयः
७५ अकरुणत्वमकारणविग्रहः परधनस्य हृतिः परयोषितां। स्वजनबंधुजनेष्वसहि
ष्णुता प्रकृतिसिद्धमिदं हि दुरात्मनां ७६ कांताकटाक्षविशिखा न खनंति यस्य चित्तं न।
निर्दहति कोपकृशानुतापः कर्षंति भूरि विषयाश्च न लोभपाशा लोकत्रयं जयति कृत्स्न
मिदं स धीरः ७७ आरंभगुर्वी क्षयिणी क्रमेण लघ्वी पुरा वृद्धिमती च पश्चात्। दिनस्य
पूर्वार्द्धपरार्द्धभिन्ना छायेव मैत्री खलसज्जनानां ७८ प्रदानं प्रच्छन्नं गृहमुपगते संभ्रम
विधिः प्रियं कृत्वा मौनं सदसि कथनं नाप्युपकृतेः अनुत्सेको लक्ष्म्या निरभिभवसारा
परकथाः सतां केनोद्दिष्टं विषममसिधाराव्रतमिदं ७९ छिन्नोपि रोहति तरुः क्षीणोप्यु

भ॰वै॰
१॰
10

पचीयतेपुनश्चंद्रः इतिविमृशंतःसंतःसंतप्यंतेनविधुरेषु ८॰ भवंतिनम्रास्तरवःफलोद्ग
मैर्नवांबुभिर्भूरिविलंबिनोघनाः अनुद्धताःसत्पुरुषाःसमृद्धिभिःस्वभावएवैषपरोपका
रिणां ८१ कदर्थितस्यापिहिधैर्यवृत्तेर्नशक्यतेधैर्यगुणःप्रमार्ष्टुं। अधोमुखस्यापिकृ
तस्यवन्हेर्नाधःशिखायातिकथंचिदेव। ८२ अप्रियवचनदरिद्रैःप्रियवचनाढ्यैःस्वभाव
परितुष्टैः परपरिवादनिवृत्तैःकेचिदियंमंडितावसुधा ८३ पद्माकरंदिनकरोविक पमा ४
चंकरोतिचंद्रोविकाशयतिकैरवचक्रवालं।नाभ्यर्थितोपिजलदःसलिलंददातिसंतःस्व
यंपरहितेविहिताभियोगाः ८४ एकेनापिहिशूरेणपादाक्रांतंमहीतलं।क्रियतेभास्क राम
रेणेवस्फारस्फुरिततेजसा ८५ वरंशृंगोत्तुंगाद्गुरुशिखरिणःक्वापिविषयेपतित्वापत्को १॰
२३

पःकठिनदृषदंतर्व्विदलितः। वरंन्यस्तोहस्तःफणिपतिमुखेतीक्ष्णदशनेवरंवन्हौपातस्तदपिन
कृतःशीलविलयः ७६ वह्निस्तस्यजलायतेजलनिधिःकुल्यायतेतत्क्षणान्मेरुःस्वल्प
शिलायतेमृगपतिःसद्यःकुरंगायते।व्यालोमाल्यगुणायतेविषरसःपीयूषवर्षायतेयस्यांगे
खिललोकवल्लभतमंशीलंसमुन्मीलति ७७ यदचेतनोऽपिपादैःस्पृष्टःप्रज्वलतिसवि
तुरिहकांतः तत्तेजस्वीपुरुषःपरकृतनिकृतिंकथंसहते ७८ आज्ञाकीर्त्तिःपालनंब्रा
ह्मणानांदानंभोगोमित्रसंरक्षणंच येषामेतेषड्गुणानप्रवृत्ताःकोर्थस्तेषांजीवनेपार्थि
वानां ७९ व्यालंबालमृणालतंतुभिरसौरोद्धुंसमुज्जृंभतेछेत्तुंवज्रमणीन्शिरीषकु
सुमप्रांतेनसंनह्यति माधुर्यंमधुबिंदुनारचयितुंक्षारांबुधेरीहतेनेतुंवांछतियःसतांपा

भवै. थिषैर्लानमुक्तैः सुधास्यंदिभिः ९० स्वायत्तमेकांतहितं विधात्राविनिर्मितं छादनमज्ञता
११ याः। विशेषतः सर्ववीदां समाजे विभूषणं मौनमपंडितानां ९१ उद्भासिताखिलखल
॥ स्य विशृंखलस्य प्राग्जात विस्मृत निजाधमकर्मवृत्तेः दैवादवाप्तविभवस्य गुणद्विषोस्य
नीचस्य गोचरगतैः सुखमास्यते कैः ९२ विद्या नाम नरस्य रूपमधिकं प्रछन्नगुप्तं धनं वि
द्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः। विद्या बंधुजनं विदेशगमने विद्या परं
दैवतं विद्या राजसुपूजिता न तु धनं विद्या परं दैवतं विद्या राजसु पूजिता न तु धनं विद्या।
विहीनः पशुः ९३ दाक्षिण्यं स्वजने दया परिजने शाठ्यं सदा दुर्जने प्रीतिः साधुजने स्म राम
घः खलजने विद्वज्जनेष्वार्जवं। शौर्यं शत्रुजने क्षमा गुरुजने नारीजने धूर्तता ये चैवं पुरुषा ९४ ॥
२५

ःकलासुकुशलास्तेष्वेवलोकस्थितिः ९४ करेश्लाघ्यस्त्यागः शिरसिगुरुपादप्रणयिता
मुखेसत्यावाणीविजयिभुजयोर्वीर्यमतुलं। हृदिस्वच्छावृत्तिः श्रुतमधिगतंचश्रवणयो
र्विनाप्यैश्वर्येणप्रकृतिमहतांमंडनमिदं ९५ वहतिभुवनश्रेणींशेषः फणाफलकस्थि
तांकमठपतिनामध्येपृष्ठंसदासचधार्यते तमपिकुरुतेक्रोडाधीनंपयोधिरनादरादह
हमहतांनिःसीमानश्चरित्रविभूतयः ९६ स्पृहयतिभुजयोरंतरमायतकरवालकररुहा
विदीर्णा। विजयश्रीवीराणांव्युत्पन्नप्रौढवनितेव ९७ सजातोयेनजातेनयातिवंशःसमु
न्नतिं। परिवर्तिनिसंसारेमृतःकोवानजायते ९८ लज्जांगुणौघजननींजननीमिवस्वामत्यं
तशुद्धहृदयामनुवर्तमानाः। तेजस्विनःसुखमसूनपिसंत्यजंतिसत्यव्रतव्यवसिनोनपुनःप्रति

भ०वै० त्रां ९९ सिंहः शिशुरपि निपतति मदमलिनं कपोलभित्तिषु गजेषु प्रकृतिरियं सत्ववतां न
१२ खलु वयस्तेजसो हेतुः १०० किं कूर्मस्य भरव्यथा न वपुषि क्ष्मां न क्षिपत्येष यत्किं वा ना
12 ह्नि परिश्रमो दिनपतेरास्ते न यन्निश्चलः। किंत्वंगीकृतमुत्सृजन्कृपणवत् श्लाघ्यो जनो लज्जते निर्वाह
:प्रतिपन्नवस्तुषु सतामेतद्धि गोत्रव्रतं १ दूरादर्थं घटयति नवं दूरतश्चापशब्दं त्यक्त्वा भू
यो भवति नितरां मत्तसभारंजनेषु मंदं मंदं रचयति पदं लोकचित्तानुवृत्त्या कामं मंत्री क
विरिव सदा खेदभारैरमुक्तः २ दूरादुच्छ्रितपाणिरार्द्रनयनः संप्रोक्षितार्द्धासनो गाढा
लिंगनतत्परः प्रियकथाप्रश्नेषु पीनोत्तरः अंतर्गूढविषो बहिर्मधुमयश्चातीव मायाप राम
टुः को नामायमपूर्वनाटकविधिर्यः शिक्षितो दुर्जनः ३ देवेन प्रभुणा स्वयं जगति यद्य १२
२५

स्पश्रमाणीकृतंतत्तस्योपनयेन्मनागपिमहतांनैवाश्रयःकारणं।सर्व्वासौपरिपूरकेजलधरे
वर्षत्यपिप्रत्यहंसूक्ष्माएवपतंतिचातकमुखेद्वित्राःपयोबिंदवः ३ कोनर्जौतिवशंलो
केमुखेपिंडेनपूरितः।मृदंगोमुखलेपेनकरोतिमधुरस्वरं ४ अभिमुखेनिहतस्यसतस्त्वि
हनुतावज्जयोथवास्वर्गः उभयत्रसाधुवादःश्रवणसुखस्यैवतात्पर्यं ५ केयूरानविभू
षयंतिपुरुषंहारानचंद्रोज्ज्वलानस्नानंनविलेपनंनकुसुमंनालंकृतामूर्द्धजाः।वाण्येकासम
लंकरोतिपुरुषंयासंस्कृताधार्यतेक्षीयंतेखलुभूषणानिसततंवाग्भूषणंनकचित
६ यदिनामदैवगत्याजगदसरोजंकदाचिदपिजातं अवकिरतिकरंविकिरतितत्किं
कृकवाकुरिवहंसः ७ परिचरितव्याःसंतोयद्यपिकथयंतिनसदुपदेशं।यास्तेषांस्वैरक

कुकुट:

भ·वै·
१३
13

यास्त्राण्वमवंतिशास्त्राणि ८ दिग्गजकमठकुलाचलफणीपतिविधृतापिचलतिव
सुधेयं।प्रतिपन्नममलमतयोनचलतिपुंसांयुगांतेपि ९ स्वैत्यंद्रुणात्ममभिनीत्वशि
रोरुहाणांस्थानंपरंपरिभवस्यतदेवपुंसां: आरोपितास्थिशकलंपरिहृत्ययांतिचांड
लकूपमिवदूरतरंतनुएपः १० जातिम्मराणितत्राणिजानंतिप्रियमप्रियं।विकसंति।
प्रियंदृष्ट्वासंकुचतिवदुर्जनात ११ इतिश्रीभर्तृहरिविरचितेनीतिशतकंसमाप्तं॥ ॥
वीमिसर॥ ॥ ॥ ॥

राम
१३
२६